Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४८३

Title वास्तु पूजन पद्धतिः

Author ×

Extent ११ Age ×

Subject धर्मशास्त्रं

वास्तुपूजनविधिः

४४८३

4483
F. = 11

पद्धतिः वास्तुपूजनस्य
१५.

मु-अनन्तदेवजयदेवसुत

१ ॥ ॐ नमः सिद्धं ॥ श्रीगणेशाय नमः ॥ वास्तुपूजनं पद्धति ॥ श्रौतस्मार्त्तकर्माणि गृ
हस्थस्य सुखानि च ॥ विनागारं न सिध्यति तस्मात्कर्त्तव्यमेव तत् । तद्वास्तु
पूजनमावश्यकं । तदकरणे त्वयावहमिति । तदुक्तं । अकृत्वा वास्तुपूजायः
प्रवेशे नवमंदिरं ॥ कलहोद्वेगवैचित्त्यं हानिस्तस्य पदे पदे ॥ एवं वास्तुपूजनं वि
धाय पश्चाद्गृहप्रवेशः ॥ तदुक्तं ॥ गृहप्रासादकूपादावारामेषु यथोचितं । तव पू
जामकुर्वाणस्तवहारो भविष्यति ॥ संपूर्णे भवने चैव यथोपकरणानि च ॥
वास्तुसंपूज्य पूर्वेद्युः कृत्वा कं वा मतो न्यसैत ॥ प्रथमं शालाकर्म कारयेत् ॥ विशे
तदुक्तं गृह्यसूत्रे ॥ पश्चात् यथा वित्तानुसारेण गृहं कारयेत् । पश्चात् वास्तु ॥ श्री ॥

पूजनं। वास्तुस्वरूपज्ञानार्थं वास्तुयागोत्पत्तिमाह॥ कश्यपस्य गृहिणीतु सिं
हिकाराहुं वास्तुतनयावजीजनत्॥ पूर्वजो हरिनिकृत्त रुधरो देववैरवर
जो निपातितः॥ पूर्वमासन्महान्तुग्रस सर्वं न्नत त्त्रयं करः॥ स देवैर्निहितो नूमौ
स वास्तुपुरुषः स्मृतः॥ सर्वं देवास्तुकार्येषु पूजयद्वास्तुसंस्थितान्॥ तेना॥
सौवर्त्तते नो चेतद्भुत्तिष्ठम्माधवज्ञया। ते तस्मात्त पूजयेन्नूनं वल्यादिभि
रतंद्रियः। गृहादिकरणे यत्रन्यर्चिता वास्तुदेवताः॥ तत्र शून्यं न्त वेत्सर्वं
रक्षोविघ्नादिभिर्हतं। तस्माद्वास्त्वर्चनं। महाकपिलपंचरात्रे मंडलप्रकरणे॥
गृहप्रासादकूपानां मंडपस्य गेहे स्य च। वास्तुमंडलकं कार्यं मष्टहस्तंनुनापर

२ मिति।तंन्मंडलंचतुरस्रंकार्यं।तदुक्तौ।चतुरस्रकृतिःकश्चिदसुरःसर्वनाश
कइति।कपिलपंचरात्रे।देवैःसवास्तुपुरुषःस्थापितश्चतुरस्रइति।कपिल
पंचरात्रे।एकाशीतिपदोवास्तुगृहकर्मणिशस्यते।चतुःषष्टिपदोवास्तुप्रा
सादेषुप्रशस्यते।अन्यत्रापि।एकाशीतिपदंकृत्वावास्तुचैवगृहादिषु।चतुः
2 षष्टिपदोवास्तुप्रासादेब्राह्मणस्मृतइति।तथा।गृहेवास्तुएकाशीतिपदा
नि।प्रासादादौचतुषष्टिपदानिकुत्रचित्प्रासादेशतपदोवास्तु।राजगृहादौ
तुसहस्रपदः।स्थापनायदेवास्तावंतएवपदसंख्येःवाधिका।तत्रैकादशी श्री
तिपदेनवपदोब्रह्मा।चतुःषष्टिपदेमध्येचतुष्पदः।शतपदमध्येदशपदः। २

सहस्रपदमध्येज्ञातपदः। इतिव्यवस्थाऽन्यपदानियोजनीयानि। प्रकृतेतुएका
शीतिपदेषुदेवतास्थापनप्रकारोलिख्यते॥ तद्यथा। तन्मंडलगृहमध्येषहस्तदै
र्घ्यफलविभागेनकार्यं। केचित्तुवितस्तिद्वयंहस्तमानेनकार्यं। तदुक्तं। गृहमध्ये
यवैःशान्यांमालिखेद्वास्तुमंडलं। शालिपिष्टेनवाशुद्धैःस्तंडुलैःप्रयतःस्वयं। चतुर
स्रीकृतक्षेत्रवितस्तिद्वयसंमितं॥ हस्तद्वयसंमितंवास्यात्समंतत्रसमंततः। न
वभिर्विभजेत्भागमेकैकंनवधापुनः॥ एकाशीतिपदानिस्युरेवंतत्रविभा
जिते॥ तत्रादौएकाशीतिपदप्रकारः॥ तत्रदशरेखाःपूर्वोत्तराःकृत्वाएकाशीति
पदानिभवंति। अथमंडलेएकाशीतिपदकेदेवताविन्यासक्रमः॥ मध्येनव

२ पदोब्रह्माततस्तुरस्त्रिपदोर्यमा॥सवितादक्षिणेतस्यात्त्वविवस्वान्पश्चिमेतथा॥
विबुधाधिपतिस्तद्वदुत्तरेत्रिपदोमतः॥अग्नयेब्रह्मणोमित्रोराजयक्ष्माचनै
र्ऋते॥पृथ्वीधरस्तुवायव्येआपवत्सस्तुशांकरे॥चत्वारःपदिकाह्येतेद्वा
त्रिंशद्बाह्यतःसुराः॥शिखिपर्जन्यनामानौजयंतःकुलिशायुधौ॥सूर्यसत्यभृ
3 शाकाशोवायुःपूषणएवतु॥क्रमादीशानकोणादिवितथोथगृहक्षतः॥यमगंध
र्वनामानौभृंगराजमृगौततः॥पितृदौवारिकौतद्वत्सुग्रीवःपुष्पदंतकः॥
वरुणासुरशोकाख्यपापरोगाऽहयःक्रमात्॥मुख्यभल्लाटसोमाख्यसर्पाश्चैव श्री
ऽदितिर्दितिः॥ईशानादिचतुःकोणेषापाद्याःस्युःपदेषुच॥आपसावित्रनामा २

नोजयरुद्रः क्रमादिमे। दितिश्शिखायपर्जन्याश्चत्वारः स्युःपदानुगाः।ब्रह्माणमा
दितः कृत्वाशिखिनंच क्रमेणतु।पुष्पैर्गंधैस्तथा धूपैर्नामभिः पूजयेदिमान्॥
आवाहनादिभिः सर्वैरुपचारैः समाहितः चरकीचविदारीच पूतनापापराक्ष
सी॥ ईशानादिचतुःकोणे राक्षसीनांचतुष्टयं॥ मंडलाबाह्यतः पूज्यंततःप्रा
गादिदिक्ष्वपि। स्कंदोर्यमाजृंभकश्चतुरीयः पिलिपिच्छकः। क्रमेणपूजनीयं
तुक्षेत्रपालचतुष्टयं। तद्बाह्येलोकपालांश्चयथास्थानंप्रपूजयेत्।उग्रसे
नोऽत्रवेत्प्राच्यांदक्षिणस्यांतुडामरः। पश्चिमायांमहाकालः पिलिपि
च्छस्तथोत्तरे॥ अथवास्तुमंडलेदेवतास्थापनप्रकारः॥ ब्रह्मजज्ञानमिति

॥४॥ मध्येब्रह्माणंस्थापयामि॥ अर्यमणं बृहस्पतिमिति मध्यात्पूर्वतः अर्यमणंस्था०
२॥ सविताप्रसवित्रेति मंत्रेण मध्याद्दक्षिणतः सावित्रंस्थापयामि॥३॥ विवस्वान्नादि
त्येति मंत्रेण मध्यात्पश्चिमतः वैवस्वतंस्था०४॥ इन्द्र आसां नेतेति मंत्रेण मध्यादुत्त
रतः विबुधाधिपंस्थाप०५॥ आपवस्वेति मंत्रेण मध्यादीशाने आपवत्सं स्था०६॥ मित्र
स्य चर्षणीधृतेति मंत्रेण मध्यादाग्नेयां मित्रंस्था०७॥ इमं देवेति मंत्रेण मध्यान्नैर्ऋते रा
जयक्ष्माणं स्था०८॥ यज्ञा मेति मंत्रेण मध्यात् वायव्ये पृथ्वीधरं स्था०९॥ आपो अस्मानि
ति मंत्रेण मध्यात् ईशाने मध्यंतरपदे आपं स्था०१०॥ उपयामगृहीतोसि सावित्रो श्री
सीति मंत्रेण॥ तथा आग्नेयां सावित्रं स्था०११॥ गोत्रभिदमिति मंत्रेण॥ तथा नैर्ऋत्यां जया ॥४॥

यंस्था॰ १२। यातेरुद्रश्शिवेतिमंत्रेणतथावायव्येरुद्रंस्था॰ १३। अथबहिःपदेष्वीशानको
णात्प्रदक्षिणक्रमेणद्वात्रिंशद्देवतानांस्थापनं। तमीशानमितिमंत्रेणशिखिनंस्था॰
१४। महांइंद्रेणेतिमंत्रेणपर्जन्यंस्था॰ १५। जीमूतस्येवभवतीतिमंत्रेणजयंतंस्थाप
यामि। १६। इंद्रस्यसंम्राडितिमंत्रेणकुलिशायुधंस्था॰ १७। सूर्यस्यरश्मिर्हरिकेशइ
तीतिमंत्रेणसूर्यंस्था॰ १८। व्रतेनदीक्षेतिमंत्रेणसत्यंस्था॰ १९। गृहामेतिगृहक्षते
तिमंत्रेगृहक्षतंस्था॰ नायैदार्वाहारमितिमंत्रेणभृशंस्था॰ २०। घृतंघृतेतिमंत्रेण
आकाशंस्था॰ २१। वायोयेतेतिमंत्रेणवायुंस्थाप॰ २२। स्वयंभूरसीमंत्रेणपूषणं
स्था॰ २३। सविताप्रथमेतिमंत्रेणवितथंस्था॰ २४। गृहामेतिगृहक्षतेतिमं
त्रेगृहक्षतंस्था॰ २५। यमायत्वामखायत्वेतिमंत्रेणयमंस्था॰ २६। ऋताषाड्

॥५॥

तद्यमेतिमंत्रेणगंधर्वंस्था॰।२७।यमायत्वांगिरस्वतेतिमंत्रेणन्हंगराजंस्था॰।२८।
मृगोनभीमःकुचरोगिरिष्ठाइतिमंत्रेणमृगंस्था॰।२९।पुनंतुमांपितरइतिपितृ
भ्यस्वधेतिमंत्रेणपितृन्यंस्था॰।३०।द्वारोदेवीतिमंत्रेणद्वौवारिकंस्था॰।३१।सुषुम्णः
सूर्यरश्मिरितिमंत्रेणसुग्रीवंस्था॰।३२।ओषधीःप्रतिमोदध्वमितिमंत्रेणपुष्पदंतंस्था
॰३३।वरुणस्योत्तंभनमसीमंत्रेणवरुणंस्था॰।।३४।येरूपाणीतिमंत्रेणअसुरंस्था॰।३५।
शन्नोदेवीतिमंत्रेणशोषंस्था॰।३६।बट्सूर्यअवसेतिमंत्रेणपापयक्ष्माणंस्था॰।३७।
यद्देवादेवहेडनंइतिमंत्रेणरोगंस्था॰।३८।नमोस्तुसर्पेभ्यइतिमंत्रेणअहिंस्था॰।३९।
मानस्तोकइतिमंत्रेणमुख्यंस्था॰।४०।आप्यायस्वेतिमंत्रेणभल्लाटंस्था॰।४१।वयं॰
सोमेतिमंत्रेणसोमंस्थापयामि॰।४२।उरुंहिराजेतिसर्पंस्था॰।४३।उतनोहिर्बुध्न्यो।

श्री ॥५॥

तिमंत्रेण अदित्यै रास्नासीतिमदितिस्थं०४४ हिरण्यरूपउषसेतिदितिस्थं०४५ अ
थमंडलाद्बहिः॥ कारूपाश्चराक्षस्यकरालश्चात्रषेन्नैणः। कपालपात्रंबिभ्राणा मांस
रक्तासवप्रिया॥ तत्रराक्षसीनांचतुष्टयंयथा। चरक्यैनमः। ईशान्यां४६ विराडिति
विदार्यैनमः। आग्नेय्यां४७ द्रुपदादिवेतिपूतनायैनमः। नैर्ऋत्यं४८ रक्षोहणंव
पापराक्षस्यैनमः। वायव्ये४९॥ एतास्क्षेत्रदेवताः। देवीद्वारोवयोधसंस्कंदायनम ॥
।५०। प्राच्यां तान्नरूपयाअर्यम्णेनमः।५१। याम्यां। येरूपाणिजंभकायनमः। प्रतीच्यां।५२। यवो
सीतिमंत्रेणपिलिपिछ्छायनमः। उत्तरे। एतत्क्षेत्रपालचतुष्टयं। अथतद्बहिर्लोक
पालचतुष्टयं। उग्रश्चेतिउग्रसेनायनमः।५५। पूर्वे। उग्रलोहितेतिडामरायन
मः।५६। दक्षिणे। नमःस्तुतेनिर्ऋतेतिमहाकालायनमः। पश्चिमे५७। नतंविद

।।६।।

तिपिप्लिपिछायनमः।५८।ततोदिक्पालस्थापनं।त्रातारमिंद्रंपूर्वेइंद्रायनमः।त्व
न्नोअग्नेतवआग्निकोणेअग्नयेनमः।२यस्मिन्वृक्षेयांम्यांयमाय०३प्रतार्यायुःनैर्ऋ
त्यकोणेनैर्ऋत्यै०४।उदुत्तमंवरुणपश्चिमेवरुणायनमः।५।आनोनियुद्भिःवाय
व्यकोणेवायवे०६।वयंसोमसोमायउत्तरे७तमीशानंईशानायईशाने।८।अस्मे
रुद्राऊर्ध्वेब्रह्मणे०९स्योनापृथिविज्ञवअधःविष्णवेनमः।दिक्पालः।१०।मध्येवास्तु
देवतास्थापनं।वास्तोष्पतेप्रतिजानीह्यस्मान्ऋ३अमीवहावास्तोष्पतेऋ१वास्तो
ष्पतेध्रुवास्थूणांऋ१एवंपंचर्चेन।एवंसप्तषष्टिदेवात्मकंगृहवास्तुमंडलंसंस्था
प्यतत्रैववास्तुमूर्त्तिंस्थापयेत्।ततोपीठपार्श्वेकलशस्थापनं।प्राच्यादि४मध्येकल
श१वर्द्धनीकलश१ग्रहपीठादीशान्यांरुद्रकलशंस्थापयेत्।वास्तुमूर्त्तिंअग्न्युत्तारणं।

6

श्री
६

विध्वस्य पंचामृतस्नपनं च। कलशोस्त्कैः राज्ञो स्नानं। पावमानं। स्वस्त्ययनं। शांतिपाठः।
ततो स्थापितदेवतानां प्रतिष्ठा स्वशाखोक्तमंत्रेण। वास्तुपुरुषं ध्यात्वा। आसीत्पूर्वं म
हादैत्यो वास्तुर्यज्ञापकारकः। स देवैर्बकुकाले न युद्धे हत्वा महीतले। निपात्यर्द्दृभि
र्देवैर्न्निबद्धश्चतुरस्रकः। ईशाने मस्तको न्यस्तो नैर्ऋत्ये पादसंपुटं। जानुनी कूर्परी
कृत्य बाहुयुग्मं तथैव च। वायुव्यग्न्योस्ततो न्यस्तं हृदये चांजलिस्तथा। पदीकृत्य च तत्रो
र्ध्वे स्वयमुक्तसुरास्थिते तं वास्तो विग्रहं ध्यात्वा अग्निदेवते त्युक्त्वा वास्तुपुरुष इहस्वाग
तोस्तु वास्तुप्रसन्नो भव। ततः प्रार्थयेत्। आगच्छ वास्तुदेवेश सर्वदेवैरधिष्ठितः। भग
वन्कुरु कल्याणं यज्ञेस्मिन्सन्निधौ भव। ततः प्रणवादिनमोंतैः नाममंत्रैः गंधा
दिभिः पूज्य। ततो ब्रह्मादीनां पूजनं। अत्र केचिदंगदेवतानानंतरं वास्तु पूजयंति।

वैग्रह पूजनं मिलितोपचारैर्यथोक्तप्रकारेण। ॐ ब्रह्मणे नम इदं पाद्यं एष वो ऽर्घः इदं
वस्त्रं। इदमनुलेपनं। एतानि पुष्पाणि। एष धूपः। इदं नैवेद्यं। इदमुदकं। इदं ताम्बू
लं एवं सर्वान्पूजयेत्॥ ॐ ब्रह्मणे नमः॥१ ॐ अर्यम्णे नमः॥२ ॐ सवित्रे नमः॥३ विवस्वते
नमः॥४॥ विबुधाधिपाय नमः॥५॥ आपवत्साय नमः॥१॥ मित्राय नमः॥२ राजयक्ष्मणे। ३ पृथ्वी
धराय। ४ अद्भ्यो। १ सावित्राय। २ जयाय। ३ रुद्राय। ४ शिखिने। १ पर्जन्याय। २ जयन्ताय। ३ ई
न्द्राय। ४ सूर्याय। ५ सत्याय। ६ भृशाय। ७ अन्तरिक्षाय। ८ अनिलाय। ९ पूष्णे नमः॥१। वित
थाय। ११ गृहक्षताय। १२ यमाय। १३ गन्धर्वाय। १४ भृंगराजाय। १५ मृगाय। १६ पितृभ्यो। १७ दौ
वारिकाय। १८ सुग्रीवाय। १९ पुष्पदन्ताय। २० वरुणाय। २१ असुराय। २२ शोषाय। २३ पाप
यक्ष्मणे। २४ रोगाय। २५ अहये। २६ मुख्याय। २७ भल्लाटाय। २८ सोमाय। २९ सर्पाय। ३० अ

श्रीः
७

दित्यै०३१दित्यै०३२चरक्यै०१विडाल्यै०२पूतनायै०३पापराक्षस्यै०४स्कंदाय०१अर्यमो
०२जंभकाय०३पिलिपिछाय०४उग्रसेनायनमः।१डामराय०२महाकालाय०३पि
लिपिछाय०४।ततोदिक्पालपूजनं।इंद्रायनमः।१अग्नयेर्यमाय०३नैर्ऋतये०४
वरुणाय०५वायवे०६सोमाय०७ईशानाय०८ब्रह्मणे०९विष्णवे०१०इत्यादिसकलोप
चारैःप्रत्येकंपूजयेत्।तंत्रेणवा।ब्रह्मादिभ्यइहप्रतिष्ठापितसप्तषष्टिसंख्याकेभ्यो
देवताभ्योइमान्यत्रगंधपुष्पधूपदीपतांबूलनैवेद्यंप्रत्येकंपात्रस्थितंसिद्धान्नंप्रत्ये
कंसमर्पयामिनमः।।यथापूजाभागवोनमः।इत्यंगदेवताःसंपूज्यप्रधानंवास्तुपुरु
षंपूजयेत्।भगवन्देवदेवेश।ब्रह्मादिदेवतात्मक।तवपूजांकरिष्यामिप्रसादंकुरु
मेप्रभोः।इत्युक्त्वाॐवास्तुपुरुषायगंधंपुष्पंधूपंदीपंनैवेद्यंतांबूलंदक्षिणावस्त्रादिसम

र्पयामि। अर्घ्यं दद्यात्। पूज्योसि त्रिषु लोकेषु यज्ञरक्षार्थहेतवे। तद्धि मां नेव सिध्यंति यज्ञ
दानान्यनेकशः। अयोनिर्भगवन् गर्त्त ललाटस्वेदसंभव। गृहाण अर्घ्यं मया दत्तं वास्तोः स्वा
मिन्नमोस्तुते। मंत्रहीनं क्रियाहीनं भक्तिश्रद्धाविवर्जितं। यत्पूजितं मया देव परिपूर्णं
तदस्तु मे। नमस्ते वास्तुदेवेश सर्वविघ्नहरो भव। शांतिं कुरु सुखं देहि सर्वान्कामा
न् प्रयच्छ मे। इत्युक्त्वा प्रणमेत्। इत्यादि ब्रह्मादि वास्तुदेवतानां जलपूर्वकं प्रत्येकं ब
लिं दद्यात्। घृतकृतसुशिखिने। ईशाकोणे निवेदयेत्। ओदनं सोत्पलं दद्यात्पर्ज
न्याय घृतान्वितं। जयाय च ध्वजं पीतं पेष्टं कूर्मं च विन्यसेत्। इंद्राय पंच रत्नानि पेष्टं च
कुलिशं तथा। धूम्रं वितानं सूर्याय पेष्टं शक्तियुतं तथा। सत्याय घृतगोधूमान्नामम
स्यान्नं त्वशाय च। शष्कुल्यश्चांतरिक्षाय दद्यात्सक्तुं च वायवे। लाजाः पूष्णे तु दातव्या वित श्रीः ८

तिलयुक्तैर्मोदनं

थे चरणकोदनं॥ गृहक्षताय मध्वान्नं यमाय पिशितोदनं॥ गंधोदनं च गंधर्वे त्वंगेभेरव
स्य जिह्विकां। मृगाय यावकं दद्यात् पितृभ्यः कृशरं तथा। दौवारिके दंतकाष्ठं पैष्टैः कृष्ण
बलिस्तथा॥ सुग्रीवे पूपकान्दद्यात्पुष्पदंताय पायसं। कुशास्तंबेन संयुक्तं दद्यात्पद्मं च
वारुणे। पाशीं हिरण्मयं चापि असुराय सुरासवं। घृतोदनं तु शोषाय यवान्नैः पापय
क्ष्मणे। घृतमोदकरोगाय अहये नागकेसरं। नद्यं मुख्याय तद्व्याटे मुद्गोदनकमानये
त्॥ सोमाय मधुसंयुक्तं पायसं विनिवेदयेत्॥ नागाय शालिबीजं पिष्टमदित्यै च विलो
पिकां। पूरिकां दितये दद्यात् इत्येवं बाह्यतो बलिः। क्षीरमापायदातव्यमापवत्साय वै
दधिः। सवित्रे मोदकां दद्यात् समरीचं कुशोदकं। सवित्रे गुडपूडांश्च जयाय घृतचंदनं
विवस्वते पुनर्दद्याद्रक्तचंदनपायसं। हरितालोदनं साज्यं विबुधाधिपतये तथा॥

घृतोदनं तु मित्राय रुद्राय घृतपायसं। आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे।
पृथ्वीधराय मांसानि कूष्माण्डानि प्रदापयेत्। शर्करापायसं दद्यादर्यम्णे पुनरेव च।
पञ्चगव्यं यवांश्चैव तिलाक्षतं तह विष्मरुः। भक्ष्यं भोज्यं च विविधं ब्रह्मणे विनिवेदयेत्।
एवं संपूज्य देवांशान्तिं कुर्वीत सर्वदा। सर्वेभ्यः काञ्चनं दद्याद्ब्राह्मणं पयस्विनीं। राक्षसी
नां बलिं दद्यान्मांसोदनयुतं सदा। ईशानकोणमाश्रित्य चरक्यै विनिवेदयेत्। मांसोद
न ह हरिद्र ह उदनं रुधिरं सह। आग्निकोणे बलिं दद्याद्विडाल्यै नाम राक्षसी। दध्योदनं स
रुधिरं मत्स्यखंडैश्च संयुतं। पीतं रक्तं बलिं दद्यात्पूतनायै तु नैर्ऋते। वायव्ये पापराक्षस्यै
मत्स्यमांसं सुरासवं। उग्रसेनं तु पूर्वेण डामरं दक्षिणे तथा। पश्चिमे तु महाकालं पिलि श्रीः
पिच्छं तथोत्तरे। पूजनीयं प्रयत्नेन क्षेत्रपालं च तुष्टये। पायसं चापि दातव्यं स्वनाम्ना सर्व ९

9

तः क्रमात्तान्नमस्कारांतयुक्तेनप्रणवाद्येनसर्वतः। तदन्नावेदर्भपुष्पदध्यक्षतब
लिं हरेत्तात ततः पूर्वादितुमांसोदनं स्कंदाय। तिलोदनं पोलिकाश्रपूपाद्याश्र्यमणे
मांसरुधिरेजंभकाय। भक्तंन्ने पित्तानिपिलिपिच्छाय। भद्द्यभोज्यैर्दिकुपालाय। रवाम्नु
देवतानां पायसेनसाज्येन तदन्नावेकुशपुष्पदधिकुशक्तैरपि सर्वत्र बलिंदद्या
त्। अथ तत्पूर्वतो गोमयोपलिप्तायां भूमौ॥ ॐ भूतेभ्यो नमः। ॐ पितृभ्यो नमः। राक्ष
सेभ्यो॰ पिशाचेभ्यो नमः। मातृभ्यो॰ गणेभ्यो॰ दिव्यंतरिक्षभूमेभ्यो॰ इंद्राय॰ अग्न
ये॰ यमाय॰ नैर्ऋतये। वरुणाय। वायवे। सोमाय। ईशानाय। ब्रह्मणे। विष्णवे॥ अथग्रं
थांतरं दृष्टा बलिविशेषः। सर्वत्र गंधादिभिः पूजा कृत्वा बलिर्देयः। गृहाद्बहिर्दद्यात्। अ
सितांगभैरवाय नमः। रुद्रभैर॰ चंडभै॰ क्रोधभैर॰ उन्मत्तभैर॰ कपालीभैर॰ भीष

एग्नेरः०।सिंहारग्नेरः०। तथैव दिक्षु। ब्राह्मै०१।महाश्वर्ये०२।कौमार्ये०३।वैष्णव्ये०४वाराह्यै:
५। ऐंद्र्यै०६।चामुंडायै०७महालक्ष्म्यै०८।ततो द्वारतः विघ्नराजाय०१ तथा द्वारशाखयो:
धात्रे नमः।विधात्रे नमः।श्रीयायै नमः।अदीपस्थाने दीपायनमः।चुल्यां धर्माय०
संधान नांडे।ज्येष्ठायै०।जलस्थाने।वरुणाय:।पेखण्यां सुन्नगायै०।उलूखलमुसले।
द्रोणपीठा।शयनीये।कामाय०।कुंडमेतत्पूर्वदिक्षु दिक्पालेभ्यो दशादिक्षु बलिंद
त्वा पीठपालेभ्यो दशदिक्षु बलिंदद्यात्।ॐ हेतुकाय नमः१पूर्वे।त्रिपुरांतकाय२।अ
ग्नये।अग्निवेतालाय।याम्यां।अग्निजिह्वाय।नैऋते।कालाख्याय।पश्चिमे।करालि
ने।वायव्ये।एकपदाय।उत्तरे।चंडरूपिणे।।ईशानाय।एककंठाय०।ऊर्द्ध्वे।देवारुणा ।।श्रीः।।
य०।अधः।।इति बलिविधानं।ततो पूर्णाहुतिः।वास्तुमूर्त्तिद्वयं कृत्वा।वास्तुपूजांतेसु ।।१०।।

॥११॥ र्त्तिराचार्याय दद्यात्॥ द्वितीयमूर्त्तिस्तु विनिखनयेत्॥ तत्र मंत्रः॥ वास्तो ब्रह्मादि
देवानां गन नमस्ते त्वं गृहप्रियः॥ आयुर्वित्तं सुखं देहि विघ्नहन्त्री सदा त्व वा॥ यथा मेरुगि
रेः श्रृंगे देवानामालयः सदा॥ तथा ब्रह्मादि देवानां सिह गेहो गतिर्न्नवेत्॥ इति मंत्रेण
नागमूर्त्तेन्तु विनिखननं पूजयित्वा॥ अनेन विधिना सम्यक्॥ वास्तु पूजां करोति
यः॥ आरोग्यं पुत्रलाभं च धन धान्यं च विंदते॥ ॥ ततो वास्तु नमस्कार मंत्रः॥
ज्ञानता ऽज्ञानता वापि शांति शक्तिं न कृतं हि तत्॥ तत्त्वसंपूर्णमेवास्तु प्रसन्नो भ
व सर्वदा॥ यो वास्तुगणाः सर्वे पूजामादाय कृत्स्नशः॥ सिद्धिं च विपुलं दत्वा पुन श्रीः॥
रागमनाय च॥ ॥ इति वास्तुपूजनविधिः समाप्तः॥ ॥ सं ७६ पौष कृष्ण सप्तमी भानुवार